Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 3 | ISSN : 2582-0095

# भ्रष्टाचारसप्तशत्यां रसनिबन्धनम्

कमलिनीमहारणा
शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Artic Info**
Volume 5, Issue 3
Page Number : 73-77

**Publication Issue :**
May-June-2022

**Article History**
Accepted : 01 May 2022
Published : 10 May 2022

**शोधसारांशः** – आधुनिकसंस्कृतसाहित्ये प्रसिद्धेषु कविषु कवेः श्रीशिवसागरत्रिपाठिमहोदयस्य नामापि प्रसिद्धं वर्तते। अनेन महानुभावेन “भ्रष्टाचारसप्तशती” इति नामानं प्रबन्धकाव्यं रचितम्। अत्र भारतवर्षे भारताद्बहिश्च प्रचलितानां भ्रष्टाचाराणां वर्णना, तेषां निराकरणोपायानां वर्णना च क्रियते। अत्र साहित्यिकदृष्ट्या रसनिबन्धनं प्रकृतशोधपत्रस्य मूलं लक्ष्यं भवति। भ्रष्टाचारसप्तशतीकाव्ये कस्याप्येकस्य नायकस्य नायिकायाः वा वर्णना न कृतास्ति, तथापि तत्र भ्रष्टाचारः प्रतीकात्मकतया नायकरूपेण कल्पयितुं शक्यते। एतादृशानम्बनेन विविधैः उद्दीपनविभावैश्च काव्यमिदं रसास्वादनं जनयति। अत्र प्रमुखतया शान्तरसः भवतीति निर्धार्यते। भावः, हास्यम् इति सामान्यरूपेण रसद्वयम् उद्भावितम्।

**कूटशब्दाः** – भ्रष्टाचार, भ्रष्टाचारसप्तशती, शिवसागरत्रिपाठी, रसः, शान्तरसः, हास्यरसः, भावः।

**भ्रष्टाचारसप्तशत्यां मुख्यरसः** - महाकाव्यादिषु प्रबन्धेषु नाटकादिषु वा परस्परनैरपेक्षेणाङ्गाङ्गिभावमाश्रित्य बहवः रसाः कविभिरुपनिबध्यन्ते। तथाऽपि प्रबन्धानां श्रेष्ठतामिच्छता कविना एकः तत्रत्यनानारसानामन्यतमः कश्चिद्रसः अङ्गिरूपेण निबन्धनीयः इति ध्वन्यालोककारेणानन्दवर्धनेनोक्तम् । यथा –

प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने ।
एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता ।।[1]

अपि च तत्रोच्यते – “अत्र च पुनः पुनरुक्तमपि सारतयेदमुच्यते –

व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि ।
रसादिमय एकस्मिन् कविः स्यादवधानवान् ।।”[2]

अर्थात् काव्येषु काव्यार्थानन्त्यहेतुभूते व्यङ्ग्यत्वे व्यञ्जकत्वे च विविधे सम्भवत्यपि नवनवार्थप्रतिपादनेच्छुः कवी रसादिमये एकस्मिन् मुख्ये व्यङ्ग्यव्यञ्जकसम्बन्धे रामायणे करुणो महाभारते च शान्त इव अवधानवान् सर्वदा सयत्नः स्यात् ।

महाकाव्येषु नाटकेषु च प्रधानतया शृङ्गारः, वीरः, शान्तः इति त्रिषु रसेषु कश्चन एकः अङ्गिरसरूपेण कल्पनीय इति आलङ्कारिकाः वदन्ति । अन्ये रसाः अङ्गरूपेण स्युः । रामायणे प्रधानः रसः करुणो भवति । महाभारते प्रधानः रसः शान्तः । एवं शृङ्गार-वीर-शान्तरसान् त्यक्त्वा करुणोऽपि नैकेषु काव्येषु नाटकेषु च प्रधानरसत्वेन सहृदयैः आस्वाद्यते । महाभारतं तु युद्धप्रधानं चेदपि अन्ततो गत्वा संसारः असार इति प्रतिभानात् शान्तः एव फलत्वेन प्राधान्यं भजते इति आनन्दवर्धनाचार्यः ध्वन्यालोके उपस्थापयति ।

एवं रसविचारे सति आचार्यशिवसागरत्रिपाठिवर्येण रचिते भ्रष्टाचारसप्तशतीकाव्ये कः रसः अङ्गी भवति, अन्ये च के रसाः अङ्गरूपेण तिष्ठन्ति इति विचारः अत्र प्रस्तूयते ।

**भ्रष्टाचारसप्तशत्यां मुख्यरसविचारः** - भ्रष्टाचारसप्तशतीकाव्ये भ्रष्टाः खलनायकाः, तेषां भ्रष्टनीतिः, भ्रष्टव्यवहारः, प्रवञ्चना, धनलोलुपता, कलहः, आतङ्कवादः, समाजस्य कुत्सितचित्रम्, युद्धम्, परपीडनम् इत्यादयः नैके घृण्यास्पदाः विषयाः

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

उट्टङि्कता: वर्तन्ते । अनेन समकालिकसामाजिक-व्यवस्थां प्रति काऽपि असूयाभावना सहृदयपाठकानां मनसि जायते । अनेन काव्यस्य धारावाहिका-ध्ययनेन संसार: असार: इति प्रतीयते । यथा महाभारते फलं शान्ति: अस्ति, तथैव अत्रापि कवे: उहसंहृति: शान्ते: कृते एव क्रियते । अत: काव्यमिदं शान्तरसप्रधानमिति कथनेनात्युक्तिर्नैव जायेत । महाभारते शान्तरससाधनावसरे ध्वन्यालोककारेणानन्दवर्धनेन ये ये विषया: उल्लिखितास्सन्ति, ते सर्वेऽपि विषया: अत्र संलक्ष्यन्ते। तत्र महामुनिना व्यासेन वैराग्यजननतात्पर्यं प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षण: पुरुषार्थ: शान्तो रसश्च मुख्यतया विवक्षाविषयत्वेन सूचित इति ध्वन्यालोककारस्य अभिप्राय: । तत्रोच्यते मुनिना बहुधा –

यथा यथा विपर्येति लोकतन्त्रमसारवत् ।

तथा तथा विरागोऽत्र जायते नात्र संशय: ।।[3] इति ।

भ्रष्टाचारसप्तशत्यामस्यां प्रतिपादिता: सर्वेऽपि विषया: आधुनिकसमाजस्य असारतामेव प्रतिबोधयन्ति । देशे भ्रष्टाचारिणां संख्या वर्धते । सामान्यजना: सर्वत्र पीडिता: भवन्ति । सर्वेषाम् आचारणं भ्रष्टमस्ति, व्यवहारा: भ्रष्टा: जाता: । बहुत्र मिथ्या, प्रवञ्चना, दुराचार:, कपटाचार: अवलोक्यते । प्रलोभनम्, परितोषणञ्च सामाजिकव्याधिरूपेण समागतम् । निष्ठा नष्टा । खादेत् खादयेत्, पिबेत् पाययेत्, जीवेत् जीवयतात् इति मन्त्रध्वनि: श्रूयते । कवि: भ्रष्टाचारस्य सर्वेषामपि कारणानां प्रतिपादनं काव्येऽस्मिन् सुष्ठु उपस्थापयति । यथा –

लोलुपतापराधानां, जातिवादस्य वै पुन: ।

साम्प्रदायिकतायाश्च भ्रष्टतामूलकारणम् ।।[4]

दीना:, हीना: अत्यन्तं विवशा: जना: अद्य दु;खमनुभवन्ति । बाला: वृद्धाश्च कठिनं जीवनं यापयन्ति । शिष्टाचार: भ्रष्टगर्ते पतित: अस्ति । सर्वत्र भ्रष्टाचार: एव दृश्यते । तदुच्यते कविना –

दीना हीना गहनविवशा भुञ्जते त्वद्य दु:खं

बाला वृद्धा: कठिनकठिनं जीवनं यापयन्ति ।

शिष्टाचार: सरलमतिगो भ्रष्टगर्ते पपात

भ्रष्टाचार: सकलविषये विस्तृतो दृश्यते वै ।।[5]

अनेन दु:खविमुक्त्यर्थं काऽपि मानसिकी भावना समुत्पद्यते । भ्रष्टाद् दूरम् अपसारणार्थं प्रवृत्ति: जागर्ति सहृदयपाठकस्य मनसि । कवि: चतुर्थाध्यायेऽपि नैके भ्रष्टाचारप्रवर्धनस्य हेतव: प्रोक्ता: । पञ्चमे भ्रष्टाचारोन्मुखानां स्वभाव: वर्णित: । इदानीं देशस्य सर्वत्र क्रौर्यं, धौर्त्यम्, दौष्ट्यं शाठ्यं, हिंसनम्, प्रचलति कविना उपस्थाप्यते । कवि: अत्र धर्मार्थकाममोक्षाणां पुरुषार्थानां सम्प्राप्ति: मानवस्य परमं चरमं च लक्ष्यमिति आचार्यमतोपस्थापनपूर्वकं निर्दिशति। यथा –

पुरुषार्थार्जनं पुण्यं महत्कर्म समुच्यते ।

त्रिकमन्यत्तु विस्मृत्य, पुरुषैर्थ इष्यते ।।[6]

अर्थात् मनुष्य: धर्मम्, मोक्षम्, कामं च त्यक्त्वा इदानीं केवलम् अर्थम् अनु एव धावति । मोक्ष: संसारेतरविषयोऽस्ति, धर्म: निरपेक्ष: इत्युच्यते । अत: जना: मोक्षं धर्मञ्च त्यक्त्वा केवलं कामे अर्थे च संलग्ना: वर्तन्ते । कविनोच्यते –

संसाराद् बहि: मोक्ष: धर्मस्तु निरपेक्षित: ।

अतोऽर्थस्य च कामस्य सेवनं क्रियते मुदा ।।[7]

एवमेतै: उपर्युक्तै: श्लोकै: कवि: पुरुषार्थेषु मोक्षार्थं धर्मार्थं जनानां प्रवृत्ति: स्यादिति परोक्षेण निर्दिशति । जना: केवलम् अर्थम् अथवा काममनु न गच्छेयु: । धर्मनिष्ठकर्मणा निष्कामभावनया कार्यं क्रियते चेत् भगवत्सत्ता प्राप्यते इति सर्वमत्र ऊह्यं वर्तते ।

अपि च कविः षष्ठसर्गे आधुनिकुयगे भ्रष्टवर्गाणां समुत्थानसन्दर्भे उल्लिखति । सर्वकारस्य नीत्या एव अयं भ्रष्टवर्गः प्रवर्धते । सर्वेऽपि जनाः क्रौर्यहत्यापराधेषु निरताः दृश्यन्ते । भ्रष्टाचारः रक्तबीजराक्षसवत् देशे व्याप्यते । अस्मिन् सन्दर्भे महादेव्याः दुर्गायाः महाकाल्याः आविर्भावः स्यादिति कवेः निवेदनं भवति । यथा –

भ्रष्टाचारिनिपातस्तु शतमुखः सुनिश्चितः ।
परं प्रादुर्भवन्तीह सततं रक्तबीजवत् ।।
रक्तबीजायते ह्यद्य भ्रष्टाचारमहासुरः ।
महाशक्तिः महाकाली समैत्वाश्विति याचना ।।[8]

अनयोः श्लोकयोः कविः भ्रष्टाचारस्य रौद्रस्वरूपमुपस्थापयति । तथा च महाकाल्याः उत्साहमूर्त्तेः वन्दनं करोति । रक्तबीज–महाकाल्योः महासंग्रामः अत्र स्मर्यते । वस्तुतः माता पार्वती दुर्गा वा राक्षसानां संहारार्थं नैकान् अवतारान् स्वीकृतवती। शुम्भ–निशुम्भ–धूम्रिवलोचन–महिषासुरादिदानवानां संहारः देव्या दुर्यगया कृतः । रक्तबीजोऽपि तथैव एकः क्रूरः दानवः आसीत् । मार्कण्डेयपुराणाधारेण दुर्गासप्तशत्याम् अष्टमाध्याये रक्तबीजसंहारवर्णना क्रियते । ब्रह्मणा प्राप्तबलः रक्तबीजः देवान् पीडितवान् । ततः महाकालीरूपेण पार्वती आविर्भूय रक्तबीजममारयत् । रक्तबीज–महाकाल्योर्मध्ये भयङ्करं युद्धं प्रवृत्तम् । माता पार्वती चण्डीरूपेण रक्तबीजस्य प्रत्येकं रुधिरबिन्दुं पिबति स्म । अन्ततो तस्य संहारमकरोत् । अनेन देव्याः उत्साहमूर्त्तिः वीररसं द्योतयति ।

कविः भ्रष्टाचारदानवस्य संहारार्थं जनेषु तादृश्याः उत्साहशक्तेः आवश्यकता भवेदिति सूचयति । अनेनैव मानवेषु शान्तिः समागमिष्यतीति कवेः अभिप्रायः ।

भ्रष्टाचारः शमं यातु, राष्ट्रश्रीः वर्धतां सदा ।
मानवता प्रदीप्ताऽस्तु विश्वशान्तिः भवेद् ध्रुवा ।।[9]

इति श्लोकमाध्यमेन कविः शमस्योल्लेखनं करोति, विश्वशान्तेः वार्तां ददाति, सर्वेषां सुखस्य कामनां करोति । अन्ते कविना उपसंहारभागे किञ्चिन्निवेदनीयमिति नाम्ना आख्याते सप्तदशसर्गे अन्तिमे कथयति –

अवश्यं लभते कर्ता फलं पापस्य कर्मणः ।
घोरं पर्यागते काले द्रुमः पुष्पमिवात्तखम् ।।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।।
अर्थार्थी यानि कष्टानि मूढोऽयं सहते जनः ।
शतांशेनापि मोक्षार्थी ता चेन्मोक्षमाप्नुयात् ।।[10] इति ।

अतः सर्वतोमुखेन कविः शान्तेः, आनन्दस्य, मोक्षस्य, पुण्यस्य च लक्ष्यं सार्थकीकर्त्तुं काव्येऽस्मिन् प्रयतते इति स्पष्टतया ज्ञायते । तस्मात् शान्तः अत्र प्रमुखः रसः इति अस्माभिः वक्तुं शक्यते ।

**भ्रष्टाचारसप्तशत्यां गौणरसः भावो वा --**

(1) भावध्वनिः – रस्यते आस्वाद्यते इति व्युत्पत्त्या रसपदेन रसः, भावः, रसाभासः, भावाभासः, भावसन्धिः, भावोदयः, भावशबलतेति सप्तपदार्था अपि गृह्यन्ते । तदुक्तं साहित्यदर्पने –

रसभावौ तदाभासौ भावस्य प्रशमोदयौ ।
सन्धिः शबलता चैव सर्वेऽपि रसनाद्रसः ।।[11]

एतेषु भावस्य लक्षणमित्थं भवति यत् –

सञ्चारिण: प्रधानानि देवादिविषया रति: ।
उद्बुद्धमात्र: स्थायी च भाव इत्यभिधीयते ।।[12]

साधारणत: रतिस्त्रिविध: । स्त्रीपुरुषगता रति:, तिर्यग्योनिगता रति:, देवादिविषया रतिश्च । यत्र स्त्रीपुरुषगता रतिस्तत्र शृङ्गार:, तिर्यग्योनिगता रति: रसाभासो भवति । परन्तु देवादिविषया रति: भाव एव भवितुमर्हति । अत्र आदिपदेन मुनय:, गुरव:, नृपतय:, महापुरुषा:, दिव्यनायका अपि गृह्यन्ते । भावे सञ्चारिभावस्य प्राधान्यं स्वीक्रियते । अस्य स्थायिभाव: उद्बुद्धमात्र एव भवति न तु विशिष्य निश्चित: ।

भ्रष्टाचारसप्तशतीकाव्येऽस्मिन् कवि: तत्र देव-देवीस्तुतिं प्रस्तौति प्रसङ्गानुसारेण, यत्र तस्य भगवद्विषयिणी रति: स्पष्टतया आस्वाद्यते । यथा मङ्गलपद्ये -

ब्रह्मोपेन्द्रं शिवं नत्वा सिद्धिदं गणनायकम् ।
शारदां सारदां चापि रचना रचिता मया ।।[13]

अस्मिन् श्लोके कवे: ब्रह्म-उपेन्द्र-शिव-गणेश-शारदादिविषयिणी रति: स्पष्टीयते । अत: भावस्योदाहरणमिदम् ।

(2) काव्ये हास्यम् - कवि: तत्र तत्र हास्यास्पदघटनानां वर्णनामपि करोति । यथा -

मार्जनीषीकतुल्यो ना, भूत्वा मन्त्री च सांसद: ।
कूष्माण्ड: फुल्लकुप्पो वा ह्यचिराज्जायते कथम् ? ।।[14]

अस्मिन् श्लोके कवि: वदति यत् यदा मनुष्य: मन्त्री भवति तत: पूर्वं तस्य शरीरं मार्जन्या: इषीकतुल्यं क्रुशं भवति, किन्तु काले भ्रष्टाचारं कृत्वा धनादिकं स्वीकृत्व भोजनातिशयेन कूष्माण्ड: फुल्लकुप्पश्च जायते । एवं शारीरिकरूपान्तरणं कदाचित् पाठकस्य मनसि हासस्थायिभावं जागरयति हास्यरसञ्च आस्वादयोग्यं करोति ।

एवं काव्येऽस्मिन् अन्येऽपि केचन भयानक-वीररसपोषका: उद्दीपनविभावा:, व्यभिचारिभावाश्च प्राप्यन्ते । किन्तु सर्वेऽपि प्रायश: शान्तं प्रति एव मुखीभूय तिष्ठन्ति ।

- टिप्पणी -

1. ध्वन्यालोक: - 4/5
2. तत्रैव - 4/5 वृत्तौ
3. तत्रैव - 4/5 वृत्तौ
4. भ्रष्टाचारसप्तशती - 3/12
5. तत्रैव - 3/20
6. तत्रैव - 5/75
7. तत्रैव - 5/76
8. तत्रैव - 6/10
9. तत्रैव - 16/34
10. तत्रैव - 17/पृ.119
11. साहित्यदर्पण: - 3/259-260
12. तत्रैव - 3/260
13. भ्रष्टाचारसप्तशती - 1/1
14. तत्रैव - 5/25

- सहायकग्रन्थसूची -

1. भ्रष्टाचारसप्तशती - डा.शिवसागरत्रिपाठी, जगदीशसंस्कृतपुस्तकालयः, झालानियों का रास्ता, किशनपोल बाजार, जयपुरम्, राजस्थानम् । संस्करणम् - 2005 ।
2. साहित्यदर्पणः - सम्पादकः - आचार्यः कृष्णमोहनशास्त्री । चौखम्बा संस्कृत संस्थानम्, वाराणसी । चतुर्थसंस्करणम् ।
3. ध्वन्यालोकः - आनन्दवर्धनः । सम्पादकः - आचार्यः जगन्नाथपाठकः । चौखम्बा सुरभारती प्रकाशनम्, वाराणसी । पुनर्मुद्रितसंस्करणम् - 2014 ।